# श्रीसोमनाथसंस्कृतयुनिवर्सिटी,वेरावलम्

| सत्रान्तपरीक्षा-अक्टूबर-२०१९ | | |
|---|---|---|
| कक्षा – आचार्यप्रथमवर्षम् (SEM-1) | प्रश्नपत्रम् – ३ | गुणा: - ७० |
| विषय: - स्वामिनारायणवेदान्तः (J) | कोड – CC412 (NEW) | समय: - ०८ त: ११ |
| दिनाङ्क: - ११-१०-२०१९ | सन्दर्भग्रन्थः – ऐतरेयतैत्तिरीयोपनिषदौ | |

## प्रथमान्वितिः (Unit-1)

प्रश्नः – १ निम्नलिखितयोरेक एव समाधेयः। ०५

१. "तस्मादिदन्द्रो नामेदन्द्रो ह् वै नाम तमिदन्द्रं सन्तमिन्द्र इत्याचक्षते परोक्षेण।
परोक्षप्रिया इव हिं देवा: परोक्षप्रिया इव हि देवा: ॥" इति मन्त्रं गोपालानन्दमुनिविरचितभाष्यानुगुणं व्याख्यात।

२. परमपुरुष: परमात्मा देवेभ्य: भोगाश्रयार्थं किं किं दत्तवान् ? यथाग्रन्थं लिखत।

प्रश्नः – २ कस्याऽपि एकस्य प्रश्नस्य समाधानं कुरुत। १०

१. ऐतरेयोपनिषद: शान्तिमन्त्रं विलिख्य यथाभाष्यं व्याख्यात।

२. ऐतरेयोपनिषद: सारभागं सङ्गृह्णीत।

## द्वितीयान्वितिः (Unit-2)

प्रश्नः – ३ निम्नलिखितयोरेक एव समाधेय:। ०५

१. का नाम शिक्षा ? समन्त्रं स्पष्टयत।

२. "शीक्षां व्याख्यास्याम: .............॥" इतीमं मन्त्रं सम्पूर्य भाष्योक्तदिशा व्याख्यात।

प्रश्नः – ४ कस्याऽपि एकस्य प्रश्नस्य समाधानं कुरुत। १०

१. अङ्गभूतां पराविद्यां सविशदं विवेचयत।

२. "यश्छन्दसामृषभो..........॥" इतीमं मन्त्रं भाष्योक्तदिशा व्याख्यात ।

## तृतीयान्वितिः(Unit - 3)

प्रश्नः – ५ निम्नलिखितयोरेक एव समाधेयः । ०५

१. यथाभाष्यं मनोमयकोशं परिचाययत ।

२. सोऽकामयत..........सच्च त्यच्चाभवदिति मन्त्रं व्याख्यात ।

प्रश्नः – ६ कस्याऽपि एकस्य प्रश्नस्य समाधानं कुरुत । १०

१. आनन्दवल्लीमाधारीकृत्य यथाभाष्यं कोशपञ्चकमुपपादयत ।

२. सत्यं ज्ञानमनन्तं ब्रह्म – इति श्रुतिवाक्यं सुबोधिनीटीकानुगुणं व्याख्यात ।

## चतुर्थान्वितिः (युनिट-4)

प्रश्नः – ७ निम्नलिखितयोरेक एव समाधेयः । ०५

१. आनन्दो ब्रह्मेति गोपालानन्दमुनिविरचितभाष्यानुगुणं स्पष्टयत ।

२. यतो वा उमानि भूतानि जायन्ते । येन जातानि जीवन्ति ।
यत्प्रयन्त्यभिसंविशंन्तीति मन्त्रं व्याख्यात ।

प्रश्न-:- ८ कस्याऽपि एकस्य प्रश्नस्य समाधानं कुरुत । १०

१. भृगुवल्ल्यनुसारं अन्नदानस्य माहात्म्यं लिखत ।

२. ब्रह्मविद्याङ्गतया अनुष्ठेयानि व्रतानि भृगुवल्ल्यनुसारं लिखत ।

## अन्वितयः, १-४ (Units – 1-4)

प्रश्नः- ९ अधोनिर्दिष्टेषु प्रश्नेषु केचन दशप्रश्नाः समाधेयाः । १०

१) “मरः” इति शब्दस्य कोऽर्थः ?

२) “ऐतरेयोपनिषत्” इति नामाभिधानं किमर्थं जातम् ?

३) इदन्द्रः इति कस्य नाम ?

४) किं ऋणत्रयम् ?

५) “अलूक्षा:” इति पदस्य कोऽर्थ: ?

६) प्राणापानादय: सर्वे प्राणा: केन महीयन्ते ?

७) चतुर्था व्याहृति: का ?

८) इयं तैत्तिरीयोपनिषत् कुत्र उपलभ्यते ?

९) ब्रह्मवल्या: अपरं नाम किम् ?

१०) रसो वै स: । इति कस्यां वल्ल्यां समन्वितं वाक्यम् ?

११) इमानि भूतानि केन जीवन्ति ?

१२) यतो वा इमानि ........इति मन्त्रं पूरयत ।

१३) तैत्तिरीयोपनिषदि कति वल्लय: सन्ति ?

१४) एकोऽहं बहुस्यामित्यत्र एकपदविधायक: क: ?

१५) संसारिण: जीवस्य कति जन्मानि ?

*****